त उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्व

२ येनाद्वितीयब्रह्मसिद्ध्यर्थं। एवं च मृद्वत् ब्रह्मोपादानं कुलालवदधिष्ठातृ अन्यद्वास्तु राज्यस्थितौ सत्त्वं वान्य एव
स्थितौ कर्त्तास्त्वित्याशंक्याह यत इति त्रितयमत्र लक्षणमिति। २। एवं जगत्कारणत्वेन ब्रह्मणः सर्वज्ञत्वमर्थादुक्तं
तदार्थिकसर्वज्ञत्वे हेत्वन्तरेण समर्थयितुमाह। शास्त्रयोनित्वात्। ३। शास्त्रं वेदः तद्योनित्वं तत्कर्तृत्वं सर्वज्ञकल्प
वेदकर्तृत्वादपि ब्रह्म सर्वज्ञमित्यर्थः। अत्र सर्वज्ञत्वानिर्धारणं पूर्वपक्षफलं तन्निर्धारणं सिद्धान्तफलं। अथवा
वेदस्य नित्यत्वाद् ब्रह्मणो विश्वयोनिता नेति शंकामपाकर्तुं शास्त्रयोनित्वमुच्यते। अस्मिन् पक्षे श्रौतप्रतिज्ञ यतोवेति
त येव संगतिः पूर्वसूत्रोक्तजगत्कारणत्वस्य समर्थनात्। अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजु
र्वेदः सामवेद इत्यादिवाक्यमस्य सूत्रस्य विषयः। अस्य नित्यसिद्धस्य ब्रह्मणो निश्वासवदनायासेनैव वेदः
सिद्ध इत्यर्थः। अत्र ब्रह्म वेदं करोति न करोतीति संदेहे न करोति वाचा विरूपनित्ययेति नित्यत्वश्रवणात्।
अस्मिन्मन्त्रे विरूपेति देवतां संबोध्य नित्यया वाचा स्तुतिं प्रेरयेति प्रार्थ्यते। अनादिनिधना नित्या वागुत्सृष्टा स्व उच्चारिता
यंभुवा आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः इति स्मृतेः। अतो न वेदकर्तृत्वं इति न ब्रह्मयोनित्वमिति प्राप्ते ब्रह्मणः
ब्रूमः। निश्वसितन्यायेन वेदोत्पत्तिश्रवणात्। तस्माद्यज्ञात्सर्वहुत ऋचः [illegible] सामानि जज्ञिरे इति सर्वैर्यो
र्हूयमानाद्यज्ञशब्दवाच्याद् ब्रह्मणो जज्ञिरे इति वेदकर्तृत्वप्रतीतेर्विश्वयोनित्वं एतदनुरोधेन वाचेत्यादि अनुरोधे
ब्रह्मणः श्रुतिस्मृत्योरर्थवादत्वं न च वेदस्य स्मर्तृत्वे पौरुषेयत्वमुपलभ्य विरचितत्वानंगीकारादिति। अस्य सू
त्रस्य द्वितीयवर्णकं। पूर्वसूत्रे जन्मादिकारणत्वकथनेनांकुरादिकं सकर्तृकं कार्यत्वात् घटवदित्यनुमान
मपि ब्रह्मणि प्रमाणमित्याशंका स्यात्तन्माभूदितीदमुच्यते ब्रह्म न मानान्तरवेद्यं कुतः शास्त्रयोनित्वा
च्छास्त्रं वेदो योनिः प्रमाणं यस्य तत्त्वादित्यर्थः। तत्त्वौपनिषदं पुरुषं पृच्छामीत्युपनिषदेकवेद्यत्वप्रतीतेः। नावे ३

रोधसाधनफलविषयतयाऽनेकविधत्वेपि प्रथमं ब्रह्मणः प्राधान्याल्लक्षणार्थमिदं सूत्रं । जन्माद्यस्य यतः । शास्त्र
स्यापूर्वाधिकरणेन संदिग्धत्वात् ब्रह्म विचार्यमित्युक्तमयुक्तं । जन्मादेरन्यनिष्ठत्वेन ब्रह्मणो लक्षणाभावेन स्वरू
पस्यैवाभावादिति वैरूप्याक्षेपसंगतिः । एवं पूर्वाधिकरणसिद्धांतयुक्तिमुत्तराधिकरणपूर्वपक्षयुक्तिं चावेक्ष्य
पासंभवमाक्षेपसंगतिस्तत्र तत्रोह्या । दृष्टांतप्रत्युदाहरणसंगती च सर्वत्र संभवतः । प्रकृते तु यथा संदिग्धत्वेन हेतु
ना ब्रह्म विचार्यं एवं जन्माद्यन्यनिष्ठत्वेन हेतुना ब्रह्मणो लक्षणं नास्तीति दृष्टांतसंगतिः । यथा विचार्यत्वे हेतुर्न तथा
लक्षणसद्भावे हेतुरस्तीति प्रत्युदाहरणसंगतिः । पूर्वसूत्रस्य ब्रह्मलक्षणपरीक्षणं तदेवात्र फलं । अथेदं विषयवाक्यं
यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति प्रयंति म्रियमाणानी
त्यर्थः । तथा च म्रियमाणानि संते अभिसंविशंतीति वाक्यार्थः । अत्र श्रूयमाणं जन्मादिकं ब्रह्मलक्षणं न वेति संदे
हः । जन्मादेः प्रपंचनिष्ठत्वेन ब्रह्मसंबंधाभावान्न लक्षणमिति प्राप्ते । न च सत्यं ज्ञानमित्यादिवाक्यस्य सत्यादिकं ल
क्षणं भवत्विति वाच्यं लोकेऽप्रसिद्धभिन्नार्थानामेकब्रह्मलक्षणत्वेनाऽप्रसिद्धत्वादिति प्राप्ते । अभिधीयते जगज्जन्मादिकारण
त्वं ब्रह्मणो लक्षणं न तु स्वयं सत्यादिकं तु स्वरूपलक्षणं । न च लोके प्रसिद्धभिन्नार्थानां सत्यादीनामेकब्रह्मलक्षणमप्रसि
द्धमिति वाच्यं सत्यादेः पदानामखंडार्थत्वेनैकब्रह्मपर्यवसायित्वेन सत्यादीनां लक्षणत्वसंभवादिति । सूत्रा
र्थस्तु जन्माद्यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः । जन्मस्थितिभंगं समासार्थः । पूर्वसूत्रस्य ब्रह्मपदानुषंगः । त
च्छब्दाध्याहारः । तेनास्य प्रत्यक्षाद्युपस्थितस्य प्रपंचस्य जन्मस्थितिभंगं यतो भवति तद्ब्रह्मेत्यर्थः । यद्यप्यवि
द्याया जन्मादिकारणत्वे प्रत्येकं लक्षणत्वं संभवति तथापि कुलालादावतिव्याप्तिनिरासायोपादानत्वसिद्ध्यर्थं त्रयग्रहणं ।
न च लयग्रहणेनैव तत्सिद्धेः ... उपादानत्वं कुलालस्य नेति वाच्यं ... किं न स्यादिति विकारस्या

५

लसूक्ष्मशरीरादिनाकेनचिद्दह्यते तेनाकर्तेत्यर्थः एवंस्वाभाविकाः शरीरत्वाः परपर्यायमोक्षाख्यं ब्रह्मणि
त्वादिसंस्पर्शाभावेऽप्यत्यंतरमपि अन्यत्रधर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् अन्यत्रभूताच्चभव्याच्चय
त्तत्पश्यसि तद्वदेति। धर्मात्तत्फलाच्च सुखादधर्मात्तत्फलाच्च दुःखात्कृतात्कार्यादकृतात्कारणात् भूतादतीतात्
कार्यकारणते त्यर्थः भव्याद्भाविनः चशब्देनवर्तमानादन्यत्रान्यदिवमुमुक्षुपादेयत्वंनस्यात्। ब्रह्मवेदब्रह्मैवभवति। क्षीयंते चास्यक
र्माणि तस्मिन्दृष्टे परावरे। आनंदंब्रह्मणो विद्वान्नबिभेति कुतश्चनेति। अभयंवैजनकप्राप्तोसि। तदात्मा
नमेवावेदहंब्रह्मास्मीति तस्मात्तत्सर्वमभवत्। तत्रकोमोहः कः शोक एकत्वमनुपश्यतः। तद्धैतत्पश्यन्नृषि
र्वामदेवः प्रतिपेदे अहंमनुरभवंसूर्यश्च त्येवमादीनां ब्रह्मविद्याकाल एवमोक्षंदर्शयंतीनांवाधश्च
स्यात्। कर्मफलानांकालांतरभावित्वनियमात्। अतोऽमर्थस्तु योब्रह्मप्रत्यक्त्वेनवेदसाक्षात्करोतितद्दे ना
वदेवंब्रह्मभवति। तस्मिन्परमात्मनि परंकारणं अवरंकार्यं तद्रूपे तदधिष्ठाने प्रत्यक्त्वेन साक्षात्कृतेस
त्यस्यविदुषः अमुक्तफलानिकर्माणि क्षीणानिभवंति ब्रह्मणोरूपमानंदंविद्वान्भयहेत्वभावान्निर्भयो
भवतीतिशब्दः श्लोकपूरणार्थः। हेजनकत्वमभयंब्रह्मप्राप्तोसि तत्त्वसाक्षात्कारत्वात्। यदस्मिन्देहेज
लेसूर्यवत्प्रविष्टंब्रह्मजीवाख्यंतदाचार्येणबोधितमात्मानमेवसर्वकल्पनातीतमवेत् विदितवत्। कथंअ
हंब्रह्माद्वितीयमस्मीति तस्मा[illegible]दज्ञानकृतासर्वत्वादिनिवृत्त्या तद्ब्रह्मपूर्णात्मनास्थितमासीत्। यस्मि ज्ञाने
न्सर्वाणिभूतान्यात्मैवाभूद्विजानतः इतियः सर्वात्मभावोविद्याफलत्वेनोक्तस्तत्रात्मनि तदेकालेवातदा
त्मैकत्वमनुपश्यतः शोकाद्युपलक्षितः संसारोनेति तद्वदलक्ष्यंब्रह्म एतदात्मत्वेनावस्थितमहमस्मी
तिपश्यन्नस्मादेवदर्शनादृषिर्वामदेवाख्यः परंब्रह्माविद्याध्वंसद्वाराप्रतिपेदे प्रतिपन्नवान् किलेति।

दिविध्यानं न स्यात्तस्मादात्मेत्येवमुपासीत् ब्रह्मवेद ब्रह्मैव भवति ब्रह्मभवनकामो ब्रह्मवेदनं कुर्यादित्येवमा
दिविधिषु कोऽसावात्मेत्याकांक्षायां तत्समर्पकत्वेन सर्वैर्वेदान्तैरुपयुज्यंते उपासनासाध्यश्च मोक्ष इति उ
च्यते तत्तु समन्वयात् तद्ब्रह्म स्वाद्वेदान्तप्रतिपाद्यं कुतः सम्यक्त्वयादित्यर्थः न तावदुपासनासाध्यो मो
क्ष उपासनाया व्यापारतम्येन तत्साध्यमोक्षस्यापि तारतम्यमनित्यत्वं च स्यात्। विधेयकर्मफलभोगदशायां
न शरीरस्यावश्यकत्वेन मोक्षेपि शरीरं स्यात् किंच अशरीरं वा वसंतं न प्रियाप्रिये स्पृशत इति मुक्तस्य प्रियाप्रिय
स्पर्शननिषेधो न स्यात् मोक्षस्य धर्मफलत्वेन तत्रैव प्रियस्य विद्यमानत्वात्। श्रुत्यर्थस्तु वस्तुतोऽशरीरं सन्त
मात्मानं वैषयिके सुखदुःखे न स्पृशतो वा वेत्यवधारणादिति। ननु धर्मजन्याऽशरीरत्वाख्यमोक्षातिरिक्त
सुखादिनिषेधपरमिदं वाक्यमिति चेन्न अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धी
रो न शोचति। अप्राणो ह्यमनाः शुभ्रः असंगो ह्ययं पुरुष इत्यादिश्रुतिभ्योऽशरीरस्य स्वाभाविकत्वावग त्व
मात् श्रुतीनामयमर्थः वस्तुतोऽस्थूलमशरीरं तत्र हेतुः शरीरेष्विति अनवस्थेषु अनित्येषु अवस्थितं नित्यं तत्रैव दे
वेतरं महान्तमिति आपेक्षिकमहत्त्वं वारयति। विभुमिति। मतं मतव्यमिदं प्रत्याह आत्मानमिति ईदृशमात्मा
नं मत्वा धीरो भवति नहि तन्मतिं विना धीरत्वं स च शोकोपलक्षितं संसारं नानुभवतीत्यर्थः। सूक्ष्मशरीराभा
वे श्रुतिरप्राण इति। क्रियाशक्तिमान्प्राणः स च वस्तुतो नास्तीति निषेधात् तत्प्रधानानि सार्थानि कर्मेन्द्रियाणि
निषिद्धानि तदभिप्रायेणाह अमनाः ज्ञानशक्तिमन्मनोऽप्यवस्तुतो नास्तीति तन्निषेधात् तत्प्रधानानि ज्ञानेन्द्रियाणि
सार्थानि निषिद्धानि अत एव शुभ्रः शुद्ध इत्यर्थः। स च तत्र किंचित्स्पृशन्न्यागतस्तेन भवतीति स्वप्नादिवत् तत्क त्य
र्मस्वकर्तृत्वमनुक्तेऽपि हेतुरुच्यते आत्मानुपूर्वत्वान्न मूर्तेन स्पृ